# Shivaproktam Kashivasayogyatopadesham

# શિવપ્રોક્તં કાશીવાસયોગ્યતોપદેશમ્

## Document Information

Text title : Shivaproktam Kashivasayogyatopadesham

File name : shivaproktaMkAshIvAsayogyatopadesham.itx

Category : shiva, upadesha, advice, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 4 | 77-121||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં કાશીવાસયોગ્યતોપદેશમ્

- શિવપાર્વતીસંવાદે -
શ્રીપાર્વત્યુવાચ -
મહાદેવૈવમનિશં વિઘ્નોપદ્રુતમાદરાત્ ।
કથં કાશીનિવાસાર્થમુદ્યોગઙ્કર્તુમિચ્છતિ ॥ ૭૭॥

એવમુક્તપ્રકારેણ ભુવિ કસ્યાપિ સર્વથા ।
ન ભવિષ્યતિ વિશ્વેશ કાશીવાસોઽતિદુર્લભઃ ॥ ૭૮॥

કીદૃશઃ પુરુષો યોગ્યઃ કાશ્યાં સ્થાતું પુરાન્તક ।
કથં સ્થાતવ્યમનિશં વદ સર્વં વિશેષતઃ (અશેષતઃ) ॥ ૭૯॥

શ્રીશિવ ઉવાચ -
શ‍ૃણુ ગૌરિ વરારોહે યથાશાસ્ત્રં વદામ્યહમ્ ।
કાશીવાસાય યોગ્યો હિ પુરુષો વિજિતેન્દ્રિયઃ ॥ ૮૦॥

નિષ્કલ્મષો નીતિયુક્તો નિરીહો નિર્ગતસ્પૃહઃ ।
જીર્ણવલ્કલવીતાઙ્ગઃ પાણ્ડુપર્ણાશનપ્રિયઃ ॥ ૮૧॥

દયાયુક્તઃ શાન્તિયુક્તો નિરીહો નિર્ગતસ્પૃહઃ ।
અષ્ટાઙ્ગયોગનિરતો મૌનવ્રતપરાયણઃ ॥ ૮૨॥

વિભૂતિભૂષણો નિત્યં ત્રિપુણ્ડ્રાઙ્કિતમસ્તકઃ ।
રુદ્રાક્ષમાલાવીતાઙ્ગો લિઙ્ગપૂજાપરાયણઃ ॥ ૮૩॥

તુલ્યનિન્દાસ્તુતિર્ધીરસ્તુલ્યો માનાપમાનયોઃ ।
રાગદ્વેષાદિરહિતો વિરક્તો વિગતસ્પૃહઃ ॥ ૮૪॥

પઞ્ચાગ્નિસેવાનિરતો નિત્યં યાત્રારતોઽનિશમ્ ।
નિત્યાન્તર્ગૃહયાત્રાયાં નિયતો દૃઢવિગ્રહઃ ॥ ૮૫॥

પઞ્ચાક્ષરજપાસક્તઃ પક્ષે પક્ષે યથાવિધિ ।

પઞ્ચક્રોશસ્ય યાત્રાયાં નિયતઃ સત્યમાનસઃ ॥ ૮૬॥

સત્યવ્રતઃ સત્યપરો નિત્યં મત્પૂજને રતઃ ।
મદ્ભક્તજનસંસેવી મલ્લિઙ્ગૈકાર્ચનપ્રિયઃ ॥ ૮૭॥

શૈવશાસ્ત્રરતો નિત્યં શૈવવ્રતરતઃ સદા ।
કાશીવાસામ મુખ્યોઽયં મધ્યમોઽપ્યુચ્યતે જનઃ ॥ ૮૮॥

અસઞ્ચિતાકૃષ્ટપચ્યનીવારકણભોજનઃ ।
યથોક્તયાત્રાનિરતઃ સર્વસઙ્ગવિવર્જિતઃ ॥ ૮૯॥

નિર્મમો નિરહઙ્કારસ્ત્યક્તબન્ધુનિરાકુલઃ ।
સર્વદા ધૂપદીપાદ્યૈર્મલ્લિઙ્ગાર્ચનતત્પરઃ ॥ ૯૦॥

વીતરાગો ગતસ્નેહઃ પુત્રસ્નેહાદિવર્જિતઃ ।
વેદાન્તશ્રવણાસક્તો વેદાધ્યયનતત્પરઃ ॥ ૯૧॥

કાલભૈરવપૂજાયાં નિયતઃ પ્રતિવાસરમ્ ।
ઇતોઽન્યે મનુજાઃ કાશ્યાં તિષ્ઠન્તોઽપિ નરાધમાઃ ॥ ૯૨॥

કાશીવાસસમુત્પન્નધર્મભાગેન સર્વથા ।
પ્રત્યુતાસ્યાં સ્થિતાઃ કાશ્યાં પાપમેવાર્જયન્તિ તે ॥ ૯૩॥

તદન્યૈર્મનુજૈઃ કાશ્યાં ન સ્થાતવ્યં કદાચન ।
તદન્યૈરાત્મહત્યૈવ ક્રિયતે સ્થીયતે યદિ ॥ ૯૪॥

મદુક્તકર્મહીનૈસ્તુ કાશ્યાં ન સ્થેયમેવ હિ ।
કાશ્યાં પ્રતિગ્રહો નૈવ કર્તવ્યઃ સર્વથા જનૈઃ ॥ ૯૫॥

યદિ મોહાત્પ્રમાદાદ્વા કરોતિ સ પતત્યધઃ ।
નીરં વા પાણ્ડુપત્રાણિ ભક્ષયિત્વા યથાચિતમ્ ॥ ૯૬॥

સ્થાતવ્યમનિશં કાશ્યાં મુક્તિકામેન શૈલજે ।
તત્તદ્દિનાર્જિતૈઃ ધાન્યૈઃ નીવારૈર્વા સ્વકં વપુઃ ॥ ૯૭॥

પોષણીયં નિત્યયાત્રાશિવધ્યાનપરાયણૈઃ ।
દિનાન્તરાશનાર્થાય સઙ્ગ્રહઃ સર્વથા જનૈઃ ॥ ૯૮॥

ન કર્તવ્યો ન કર્તવ્યઃ કાશ્યાં પ્રયતમાનસૈઃ ।
કાશ્યાં પ્રતિગ્રહાસક્તૈર્ધનસઙ્ગ્રહતત્પરૈઃ ॥ ૯૯॥

સ્થિત્વાન્તે યાતના ઘોરા ભોક્તવ્યા નાત્ર સંશયઃ ॥ ૧૦૦॥

દુષ્પ્રતિગ્રહસંસક્તૈર્દુરન્નાશનલોલુપૈઃ ।
અન્યાયાર્જિતવિત્તૈશ્ચ કાશ્યાં ન સ્થેયમમ્બિકે ॥ ૧૦૧॥

અસત્યવાદિભિર્દુષ્ટોવિષયાસક્તમાનસૈઃ ।
શિવાચારવિહીનૈશ્ચ કાશ્યાં ન સ્થેયમમ્બિકે ॥ ૧૦૨॥

ભસ્મોધ્દૂલનરુદ્રાક્ષજટાહીનૈર્નરાધમૈઃ ।
લિઙ્ગપૂજાવિહીનૈશ્ચ કાશ્યાં ન સ્થેયમમ્બિકે ॥ ૧૦૩॥

મદન્યપૂજનાસક્તૈર્મદન્યાલોકનોત્સુકૈઃ ।
મદન્યાશ્રયચિત્તૈશ્ચ કાશ્યાં ન સ્થેયમમ્બિકે ॥ ૧૦૪॥

પુત્રસ્નેહરતૈર્લુબ્ધૈર્ધીવરૈઃ પિશુનૈર્જડૈઃ ।
સ્વદેહપોષણાસક્તૈઃ કાશ્યાં ન સ્થેયમમ્બિકે ॥ ૧૦૫॥

શિવદ્વેષરતર્મૂઢૈઃ કૃપણૈઃ શિવનિન્દકૈઃ ।
પઞ્ચાક્ષરવિહીનૈશ્ચ કાશ્યાં ન સ્થેયમમ્બિકે ॥ ૧૦૬॥

રાગદ્વેષાક્રાન્તચિત્તૈર્મદનાક્રાન્તવિગ્રહૈઃ ।
રાજસૈસ્તામસૈઃ શૂન્યૈઃ કાશ્યાં ન સ્થેયમમ્બિકે ॥ ૧૦૭॥

ઈદૃશૈઃ પાપનિરતૈઃ સ્થિત્વા કાશ્યાં યથેચ્છયા ।
દેહાન્તે યાતનાઃ ક્રૂરાઃ પ્રાપ્તવ્યાઃ સત્યમુચ્યતે ॥ ૧૦૮॥

પરસ્ત્રીનિરતૈઃ નષ્ટૈઃ શિવશાસ્ત્રવિનિન્દકૈઃ ।
શૈવદુઃખકરૈ ક્રૂરૈઃ કાશ્યાં ન સ્થેયમમ્બિકે ॥ ૧૦૯॥

પાપભીરુભિરુત્કૃષ્ટૈઃ શૈવશાસ્ત્રવિશારદૈઃ ।
લિઙ્ગપૂજાપરૈઃ શૈવૈઃ કાશ્યાં સ્થાતવ્યમમ્બિકે ॥ ૧૧૦॥

ભસ્મત્રિપુણ્ડ્રનિટિલૈઃ ભસ્મોધ્દૂલિતતત્પરૈઃ ।
રુદ્રાધ્યાયજપાસક્તૈઃ શિવવીક્ષણતત્પરૈઃ ।
નિષ્કલ્મષપરૈઃ શૈવૈઃ કાશ્યાં સ્થાતવ્યમમ્બિકે ॥ ૧૧૧॥

રુદ્રાક્ષમાલાભરણૈઃ જટામણ્ડલમણ્ડિતૈઃ ।
શિવધ્યાનરતૈઃ શૈવૈઃ કાશ્યાં સ્થાતવ્યમમ્બિકે ॥ ૧૧૨॥

મહાપાશુપતૈર્ધીરૈર્યોગશાસ્ત્રવિશારદૈઃ ।
શિવાદ્વૈતપરૈઃ શૈવૈઃ કાશ્યાં સ્થાતવ્યમમ્બિકે ॥ ૧૧૩॥

જિતેન્દ્રિયૈર્જિતાહારૈર્જીર્ણપર્ણામ્બુભક્ષણૈઃ ।
શિવૈકશરણૈ શૈવૈઃ કાશ્યાં સ્થાતવ્યમમ્બિકે ॥ ૧૧૪॥

રાગદ્વેષાદિરહિતૈશ્છિન્નસંસારબન્ધનૈઃ ।
સાત્વિકરનઘૈઃ શૈવૈઃ કાશ્યાં સ્થાતવ્યમમ્બિકે ॥ ૧૧૫॥

કલત્રપુત્રમિત્રેષ્ટસ્નેહહીનૈરનાકુલૈઃ ।
શિવભક્તરતૈઃ શૈવૈઃ કાશ્યાં સ્થાતવ્યમમ્બિકે ॥ ૧૧૬॥

યદૃચ્છાલાભસન્તુષ્ટૈઃ સુખદુઃખવિવર્જિતૈઃ ।
નિત્યં યાત્રાપરૈઃ શૈવૈઃ કાશ્યાં સ્થાતવ્યમમ્બિકે ॥ ૧૧૭॥

નિત્યં મત્પૂજનાસક્તૈઃ મદ્ભક્તજનસૈવકૈઃ ।
હૃષ્ટાન્તઃકરણૈઃ શૈવૈઃ કાશ્યાં સ્થાતવ્યમમ્બિકે ॥ ૧૧૮॥

અન્તર્ગૃહાદિયાત્રાયાં નિત્યમુદ્યુક્તમાનસૈઃ ।
મત્તત્ત્વચિન્તકૈઃ શૈવૈઃ કાશ્યાં સ્થાતવ્યમમ્બિકે ॥ ૧૧૯॥

અત્યુત્સુકૈરનિર્વિણ્ણૈઃ પ્રતિગ્રહપરાઙ્મુખૈઃ ।
વશીકૃતેન્દ્રિયૈઃ શૈવૈઃ કાશ્યાં સ્થાતવ્યમમ્બિકે ॥ ૧૨૦॥

- -

હર હર પરમેશાનન્દકન્દેશ શમ્ભો
શિવ શિવ કરુણાબ્ધે શઙ્કરાશેષહેતો ।
ભવ ભવભયહારિન્ દેવ દેવેતિ નિત્યં
શિવનગરનિવાસાક્તચિત્તા વદન્તિ ॥ ૧૨૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં કાશીવાસયોગ્યતોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૪ । ૭૭-૧૨૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 4 . 77-121..

Notes:

Śiva શિવ describes to Pārvatī પાર્વતી, the regulations, including that of the Pañcakrośātmaka Yātrā પઞ્ચક્રોશાત્મક યાત્રા, that need to be observed by those who wish to reside in Kaśī કાશી. Kaśī કાશી harbors several ŚivaTīrthaKṣetra શિવતીર્થક્ષેત્ર that are outlined in ŚivaRahasyam saptāṃśaḥ શિવરહસ્યં સપ્તાંશઃ.

Proofread by Ruma Dewan

*Shivaproktam Kashivasayogyatopadesham*
pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*